त्वादि कृत्वैतत् जलघटान्वितशक्तुदानकर्म्मणः प्रतिष्ठार्थं दक्षिणां किञ्चित् काञ्चनमूल्यं ब्राह्मणायाहं ददानीति । ततः अच्छिद्रावधारणम् । ब्राह्मणविशेषानुपदेशे यथासम्भवगोत्रनाम्ने ब्राह्मणायेति विशेषः । तत्र ब्राह्मणासन्निधाने तुभ्यमिति न देयम् । भूमौ त्यागजलप्रक्षेपः । एवमन्यत्रापि सम्प्रददे इति वाक्ये विशेषः । सत्पात्राभावे तत्सत्त्वेऽपि तत्तत्कामो विष्णुप्रीतिकामो वा विष्णवे दत्त्वा ब्राह्मणाय पश्चात् प्रतिपादयेत् ।

"दैवे दत्त्वा तु दानानि दैवे दत्त्वा तु दक्षिणाम् ।
तत् सर्व्वं ब्राह्मणे दद्यादन्यथा निष्फलं भवेत् ॥"
इति मत्स्यसूक्तात् ॥

दत्त्वेत्यत्र देयानीति वाराहीये पाठः । * ।
"वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने ।
दद्यात्सुक्ता राजेन्द्र स याति परमां गतिम् ॥"
अत्रापि यथायोग्यं संपूज्य पूर्व्ववद्वाक्येन मनोरथफलार्थिना सभोज्यघटो देयः ।*। स्मृतिः ।
"मेषादौ शक्तवो देया वारिपूर्णा च गर्गरी ॥"
तत्रापि यथायोग्यं संपूज्य पूर्व्ववत् वाक्यं कृत्वा पठेत्
"ॐ एष धर्म्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ॥"
इति मन्त्रलिङ्गान्मनोरथफलत्वं ज्ञेयम् ।*।
कृत्यचिन्तामणौ ।
"मसूरं निम्बपत्राभ्यां योऽत्ति मेषगते रवौ ।
अपि रोषान्वितस्तस्य तक्षकः किं करिष्यति ॥"
उत्तरार्द्धे तु ।
"मेषस्थे च विधौ तत्र नास्त्यङ्गे विषजं भयम् ॥"
इति संवत्सरप्रदीपे पाठः ।

ततश्च मेषस्थरविस्थितिकाले मसूरं निम्बपत्रद्वयञ्च भक्षयेत् । * । भविष्ये ।
"या शुक्ला नरशार्दूल वैशाखे मासि वै तिथिः
तृतीया साक्षया ख्याता गीर्व्वाणैरपि वन्दिता ॥
योऽस्यां ददाति करकान् वारिवाचसमन्वितान् ।
स याति पुरुषो वीर लोकान् वै हेममालिनः ॥"
वाजसनम् । हेममालिनः सूर्य्यस्य । ततो जलान्नसमन्वितकरकदाने सूर्य्यलोकगमनं फलम् । दानानुष्ठानं पूर्व्ववत् । * । ब्रह्मपुराणम् ।
"वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम् ।
कार्त्तिके शुक्लपक्षे च त्रेता च नवमेऽहनि ॥
अथ भाद्रपदे मासि त्रयोदश्यान्तु द्वापरम् ।
माघे तु पौर्णमास्यान्तु घोरं कलियुगं स्मृतम् ॥
युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः ॥"
तत्र वैशाखादयः पौर्णमास्यन्ता एव तथैव तिथिकृत्याभिधानात् । सुखबोधिन्यां कार्त्तिके नवमेऽहनीति सिद्धौ शुक्लपक्ष इति अर्थः स्यात् ।*। आसां प्रशंसामाह विष्णुपुराणम् ।
"एता युगाद्याः कथिताः पुराणैरनन्तपुण्यास्तिथयश्चतस्रः ।
उपप्लवे चन्द्रमसो रवेश्च त्रिष्वष्टकास्वप्ययनद्वये च ॥

पानीयमप्यत्र तिलैश्च मिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत् पितरो वदन्ति ॥"

उपप्लवे ग्रहणे । * । देवीपुराणम् ।
"युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥"*।
अक्षयतृतीयामधिकृत्य ब्रह्मपुराणम् ।
"तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्च्चयेत् ।
यवान् दद्यात् द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ॥
पूजयेच्छङ्करं गङ्गां कैलासञ्च हिमालयम् ।
भगीरथञ्च नृपतिं सागराणां सुखावहम् ॥"*।
स्कान्दे ।
"वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता ।
तत्र मां लेपयेद्गन्धैर्लेपनैरतिशोभनैः ॥"
मां जगन्नाथम् । * । अन्यत्रापि ।
तथा च जगन्नाथस्नानमधिकृत्य भविष्ये ।
"संवत्सरफलं राजन् नवम्यां कार्त्तिके तथा ।
मन्वादौ च युगादौ च मासत्रयफलं भवेत् ॥"*
मन्वादयस्तु भविष्यमात्स्ययोः ।
"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
तृतीया चैत्रमासस्य यथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ।
आषाढस्यापि दशमी तथा माघस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिताः ॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः ॥"
अमावास्याष्टमीव्यतिरिक्ताः शुक्लाः उपक्रमोपसंहारयोः शुक्लत्वकीर्त्तनात् । * । नारदीये ।
"वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः ।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः ॥"
इयं पिपीतकद्वादशी । नात्र युग्मादरापेक्षा । तत्र विष्णुपूजने उपवासोत्तरविधानात् । * । अथ यवान्नश्राद्धम् । तत्र वैशाखशुक्लपक्षे कृत्तशनिशुक्रेतरवारे नन्दारिक्तात्रयोदशीतरतिथौ जन्मचन्द्राष्टमचन्द्रजन्मतिथिजन्मनक्षत्रपञ्चमताराचयेतरेषु पूर्व्वफल्गुनीपूर्व्वभाद्रपदपूर्व्वाषाढामघाभरण्यश्लेषार्द्रेतरनक्षत्रेषु यवश्राद्धं कर्त्तव्यम् । तच्चेषभोजनन्तु एतादृगनिषिद्धायां विषुवसंक्रान्तौ अक्षयतृतीयायाञ्च विशेषतः कर्त्तव्यम् । वैशाखाकरणे ज्यैष्ठशुक्लपक्षे आषाढशुक्लपक्षे च हरिशयनेतरत्र कर्त्तव्यम् । इति कृत्यतत्त्वम् । * । * । अथ वैशाखमाहात्म्यम् ।
"ये कार्त्तिकव्रतपरा ये माघपरिनिष्ठिताः ।
ये वैशाखव्रतासक्तास्तेषां तुष्टः सदा हरिः ॥
सर्व्वेषामेव मासानां वैशाखः प्रवरः स्मृतः ।
पुरा हरिमुखे राजन् श्रुतमेतन्न संशयः ॥
तत्र स्नानं जपो होमः श्राद्धं दानादि यत् कृतम् ।
तत् सर्व्वं भूपतिश्रेष्ठ सत्यमक्षयमुच्यते ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः ।
भूप वैशाखमासाद्य कोट्यंशेनापि नो समाः ॥
मेरुतुल्यानि हेमानि सर्व्वदानानि चैकतः ।
एकतः सर्व्वदा भूप माधवो माधवप्रियः ॥
असंख्यानि च पापानि बहुजन्मार्ज्जितानि च ।
निमेषार्द्धेन राजेन्द्र विलयं यान्ति माधवे ॥
वैशाखमागतं दृष्ट्वा पितृणामुत्सवो भवेत् :
पुत्त्रो नियममाचर्य्य अस्मानुद्धरिष्यति ॥
आगतं माधवं दृष्ट्वा कम्पन्ते पापसञ्चयाः ।
अस्माकं नाशकालोऽयं भूपते ध्रुवमागतः ॥
वैशाखं परमं मासं माधवस्येति च प्रियम् ।
नियमेन समाचर्य्य न भूयो जायते नरः ॥
मनसा संस्मरेद्यस्तु नियमं माधवोद्भवम् ।
पूयते पातकैः सर्व्वैः शक्रेण सह मोदते ॥
वचसा यो वदेद्भूप वैशाखं माधवप्रियम् ।
अहं समाचरिष्यामि स गच्छेद्ब्रह्मणः पुरम् ॥
यः समाचरते भूप नियमेन तु माधवम् ।
स विष्णोः रूपमासाद्य विष्णुना सह मोदते ॥
नियमेन समाचर्य्य एकाहमपि भूपते ।
पितरस्तारितास्तेन यास्यन्ति परमां गतिम् ॥
तस्मिन् स्नात्वा विशुद्धात्मा दम्भमात्सर्य्यवर्ज्जितः ।
ईप्सितान् लभते कामान् श्रीविष्णोर्दयितो भवेत् ॥
ब्रह्मघ्नो वा कृतघ्नो वा मित्रब्रह्मौविघातकः ।
नियमेन नयेन्मासं स मुक्तः सर्व्वपातकात् ॥
पातकानामेकमेव प्रायश्चित्तं विदुर्ब्बुधाः ।
सर्व्वपापसमुद्भूतौ नात्र कार्य्या विचारणा ॥
वैशाखस्नायिनो लोकाः श्रीविष्णुसेवनोत्सुकाः ।
पापं न तेषां मतिमन्निह लोके परत्र च ॥
सर्व्वस्वदानं विधिवत् सर्व्वदा परिशोधनम् ।
चान्द्रायणञ्च विधिना कृच्छ्रं चैवातिकृच्छ्रकम् ॥
पुण्यक्षेत्राभिगमनं सर्व्वपापप्रणाशनम् ।
देवताभ्यर्च्चनं चैव तथैवातिथिसेवनम् ॥
कदापि येनाचरितं वाङ्मनःकायकर्म्मभिः ।
संप्राप्य ते तु कुर्व्वन्तु माधवे नियमं नराः ॥
समाचरन्ति ये मासं माधवं कृतबुद्धयः ।
सदा प्रीतिमवाप्नोषां श्रीकृष्णो देवकीसुतः ॥
या नारी विधवा भूत्वा माधवे नियमं चरेत् ।
कुलायुतसहस्रन्तु नयते परमं पदम् ॥
पुत्त्रेणापीह किं कार्य्यं येन नाचरितं नृप ।
वैशाखं पुत्त्रशतकात् नारी धन्या हरिप्रिया ॥
यो माधवेऽर्च्चयेद्राजन् गोविन्दं गोपवल्लभम् ।
न तस्य विद्यते संख्या पूजनस्य फलस्य च ॥
वैशाखस्य तु धर्म्मस्य पारं गन्तुं यदीच्छसि ।
नरेन्द्र माधवं मासं नियमेन समाचर ॥
किं करिष्यति सांख्येन योगेन नरनायक ।
मुक्तिमिच्छसि चेद्राजन् माधवं माधवेऽर्च्चय ॥
अभक्ष्यसम्भवं राजन् कुप्रतिग्रहसम्भवम् ।
तत्पापं संक्षयं याति माधवे नियमे कृते ॥
रणे यदि रिपुं जेतुं त्वमिच्छसि नराधिप ।
नियमेन तदा विष्णोः प्रियं माधवमाचर ॥
यदि सांसारिकं दुःखं हन्तुमिच्छसि भूमिप ।